# IndrakshI Stotram 2

# इन्द्राक्षीस्तोत्रम् २

## Document Information

Text title : Indrakshi Stotram 2

File name : indrAkShIstotram2.itx

Category : devii, dhyAnam, otherforms

Location : doc_devii

Transliterated by : Mohan Chettoor

Proofread by : Mohan Chettoor

Latest update : July 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

July 4, 2022

*sanskritdocuments.org*

# इन्द्राक्षीस्तोत्रम् २

विनियोग -
अस्य श्री इन्द्राक्षीस्तोत्रस्य शचीपुरन्दर ऋषिः,
अनुष्टप्छन्दः, श्रीइन्द्राक्षी दुर्गा देवता, महालक्ष्मीः बीजं,
भुवनेश्वरी शक्तिः, भवानी कीलकं ममाभीष्ट सिद्ध्यर्थे जपे
विनियोगः ।

करन्यासः -
ॐ इन्द्राक्षीत्यङ्गुष्ठाभ्यां नमः ।
ॐ महालक्ष्मीति तर्जनीभ्यां नमः ।
ॐ माहेश्वरीति मध्यमाभ्यां नमः ।
ॐ अम्बुजाक्षीत्यनामिकाभ्यां नमः ।
ॐ कात्यायनीति कनिष्ठिकाभ्यां नमः ।
ॐ कौमारीति करतलकरपृष्ठाभ्यां नमः ।
अङ्गन्यासः -
ॐ इन्द्राक्षीति हृदयाय नमः ।
ॐ महालक्ष्मीति शिरसे स्वाहा ।
ॐ माहेश्वरीति शिखायै वषट् ।
ॐ अम्बुजाक्षीति कवचाय हुम् ।
ॐ कात्यायनीति नेत्रत्रयाय वौषट् ।
ॐ कौमारीति अस्त्राय फट् ।
ॐ भूर्भुवः स्वरोम् इति दिग्बन्धः ॥

ध्यानम् ।
नेत्राणां दशभिः शतैः परिवृतां अत्युग्र चर्माम्बरां
हेमाभां महतीं विलम्बित-शिखामामुक्त केशान्विताम् ।
घण्टामण्डित पादपद्म युगलां नागेन्द्रकुम्भस्तनीं
इन्द्राक्षीं परिचिन्तयामि मनसा कल्पोक्त सिद्धिप्रदाम् ॥

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्र द्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥

इन्द्रादिभिः सुरैर्वन्द्यां वन्दे शङ्करवल्लभाम् ।
एवं ध्यात्वा महादेवीं पठामि सर्वसिद्धये ॥

इन्द्र उवाच ।
इन्द्राक्षी पूर्वतः पातु पात्वाग्नेयां तथेश्वरी ।
कौमारी दक्षिणे पातु नैरृत्यां पातु पार्वती ॥

वाराही पश्चिमे पातु वायव्यां नारसिंहयपि ।
उदीच्यां कालरात्रिर्मां ऐशान्यां सर्वशक्तयः ॥

भैरव्यूर्ध्वं सदापातु पात्वधरे वैष्णवी तथा ।
एवं दशदिशो रक्षेत् सर्वा सर्वाङ्गं भुवनेश्वरी ॥

ॐ नमो भगवति इन्द्राक्षि महालक्ष्मी सर्वजन
वशङ्करि सर्वदुष्टग्रह स्तम्भिनि स्वाहा ॥

ॐ नमो भगवति पिङ्गलभैरवि त्रैलोक्यलक्ष्मि
त्रैलोक्यमोहिनि इन्द्राक्षि मां रक्ष रक्ष हुं फट् स्वाहा ।

ॐ नमो भगवती भद्रकालि महादेवि कृष्णवर्णे
तुङ्गस्तने शूर्पहस्ते कपाटवक्षःस्थले कपालमालाधरे
परशुधरे चापधरे विकृतरूपधरे विकृतरूप-महाकृष्णसर्प-
यज्ञोपवीतिनि भस्मोद्धूलित-
सर्वगात्रि इन्द्राक्षि मां रक्ष रक्ष हुं फट् स्वाहा ।

ॐ नमो भगवति प्राणेश्वरि प्रेतासनि सिंहवाहने
महिषासुरमर्दिनि उष्णज्वर, पित्तज्वर, वातज्वर,
श्लेष्मज्वर, कफज्वर, आलापज्वर, सन्निपातज्वर,
माहेन्द्रज्वर, कृत्यादिज्वर, एकाह्निकज्वर,
द्वयाह्निकज्वर, त्र्याह्निकज्वर, चातुरह्निकज्वर,
पाञ्चाह्निकज्वर, पक्षज्वर, मासज्वर,
पाण्मासज्वर, संवत्सरज्वर, सर्वाङ्गज्वर,नाशय नाशय
हर हर हन हन दह दह पच पच

ताडय ताडय आकर्षय आकर्षय विद्वेषय विद्वेषय
स्तम्भय स्तम्भय मोहय मोहय उच्चाटय उच्चाटय हुं फट् स्वाहा ।

ॐ ह्रीं ॐ नमो भगवति प्रेतासने लम्बोष्ठी
कम्बुकण्ठि कालकालि कामरूपिणि परमन्त्र परयन्त्र
परतन्त्र प्रभेदिनि प्रतिभट-विध्वंसिनि
परबलतुरगविमर्दिनि शत्रुकरच्छेदिनि शत्रुमांसभक्षिणि
सकलदुष्टज्वर निवारिणि भूत प्रेत पिशाच ब्रह्मराक्षस
यक्ष यमदूत शाकिनी डाकिनी कामिनि स्तम्भिनि मोहिनि
वशङ्करि कुक्षिरोग शिरोरोग नेत्ररोग क्षयापस्मार कुष्ठादि
महारोगनिवारिणि मम सर्वरोगं नाशय नाशय
ह्रां ह्रीं ह्रूं ह्रैं ह्रौं हुं फट् स्वाहा ।

ॐ ऐं श्रीं हुं हुं इन्द्राक्षि मां रक्ष रक्ष मम शत्रून् नाशय-नाशय
जलरोगं शोषय-शोषय दुःख व्याधीन् स्फोटय स्फोटय क्रूरान् अरीन्
भञ्जय- भञ्जय मनोग्रन्थिं प्राणग्रन्थिं शिरोग्रन्थिं
घातय- घातय इन्द्राक्षि मां रक्ष-रक्ष हुं फट् स्वाहा ।

ॐ नमो भगवति माहेश्वरि महाचिन्तामणि
सकलसिद्धेश्वरि सकलजन मनोहारिणि
काल कालरात्रि अनले अजिते अभये महाघोर
प्रतिहत विश्वरूपिणि मधुसूदनि महाविष्णुस्वरूपिणि
नेत्रशूल कर्णशूल कटिशूल पक्षशूल पाण्डुरोगादीन् नाशय नाशय
वैष्णवि ब्रह्मास्त्रेण विष्णु चक्रेण रुद्रशूलेन यमदण्डेन
वरुण पाशेन वासव वज्रेण सर्वान् अरीन भञ्जय भञ्जय
यक्षग्रह राक्षसग्रह स्कन्दग्रह विनायकग्रह बालग्रह चोरग्रह
कुष्माण्डग्रहादीन् निग्रह निग्रह राजयक्ष्म क्षयरोग तापज्वर निवारिणि
मम सर्वज्वरं नाशय नाशय सर्वग्रहान्
उच्चाटय उच्चाटय हुं फट् स्वाहा ।

उक्त प्रयोग के करने से व्याधिनाश व शत्रुनाश होवे ।
अभिमन्त्रित जल पिलाने से ज्वारादि रोग शान्त होवे ।

Encoded and proofread by Mohan Chettoor

*IndrakshI Stotram 2*

pdf was typeset on July 4, 2022

Please send corrections to *sanskrit@cheerful.com*